# શ્રીદત્તગોરક્ષનાથકવચસ્તવરાજઃ

shrIdattagorakShanAthakavachastavarAjaH

sanskritdocuments.org

April 28, 2018

# shrIdattagorakShanAthakavachastavarAjaH

# શ્રીદત્તગોરક્ષનાથકવચસ્તવરાજઃ

## Sanskrit Document Information

Text title : dattagorakShanAthakavachastavarAja

File name : dattagorakShanAthakavachastavarAja.itx

Category : deities_misc, gurudev, kavacha

Location : doc_deities_misc

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener, NA, PSA Easwaran

Latest update : July 30, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 28, 2018

*sanskritdocuments.org*

# શ્રીદત્તગોરક્ષનાથકવચસ્તવરાજઃ

શ્રીગણેશાય નમઃ ।
શ્રીદત્તાત્રેયાય નમઃ ।
ॐ નમો દત્તગોરક્ષનાથાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
પૂર્વાયૈ ઇન્દ્રાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
આગ્નેય્યૈ અગ્નેદેવતાયૈ નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
દક્ષિણાયૈ યમાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
નૈરૃત્યૈ નિરૃતિનાથાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
પશ્ચિમે વરુણાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
વાયવ્યાં વાયવે નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
ઉત્તરાશાયાં કુબેરાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
ઈશાન્યાં ઈશ્વરાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।
ઊર્ધ્વાયાં અર્થશ્ચેદપાય નમઃ ॥

ॐ ॐ દં વં તં ॐ ॐ ॐ દત્તગોરક્ષસિધ્ધાય નમઃ ।

અધો દિશિ ભૂમિદેવતાયૈ નમઃ ॥

ૐ ૐ દં વં તં ૐ ૐ ૐ દત્તગોરક્ષસિદ્ધાય નમઃ ।
મધ્યે પ્રકાશા જ્યોતિદેવતાયૈ નમઃ ॥

પાર્વત્યુવાચ -
નમસ્તે દેવદેવેશ વિશ્વવ્યાપિન્મહેશ્વર ।
શ્રીદત્તગોરક્ષકવચં સ્તવરાજં વદ પ્રભો ॥ ૧॥

શ્રી ઈશ્વર ઉવાચ -
શૃણુ શૈલસુતે સત્યસિદ્ધમાર્ગમયોદિતમ્ ।
જ્ઞાનવિજ્ઞાનમાર્ગેણ જીવન્મુક્તો ભવેન્નરઃ ॥ ૨॥

સર્વજ્ઞત્વં કાર્યસિદ્ધિં લભતે વરમુત્તમમ્ ।
વાક્સિદ્ધિં યોગસિદ્ધિં ચ લભતે ચિન્તિતાર્થકમ્ ॥ ૩॥

ન દુષ્ટેભ્યઃ પ્રદાતવ્યં ન દાતવ્યં કુલેશ્વરિ ।
નિષ્પ્રપઞ્ચાય શિષ્યાય દદ્યાત્સવિધિપૂર્વકમ્ ॥ ૪॥

રહસ્યાતિરહસ્યં ચ મમ વક્ત્રાદ્વિનિર્ગતમ્ ।
એકાન્તે નિર્જલે રમ્યે સરિત્સિન્ધુતટે નગે ॥ ૫॥

બિલ્વસ્થલાલયે જપ્ત્વા કુલમાર્ગે શુભસ્થલે ।
સર્વસિદ્ધેશ્વરો સાક્ષાત્પ્રાપ્યતે નાત્ર સંશયઃ ॥ ૬॥

પાર્વત્યુવાચ -
અલ્પાયાસેન દેવેશ પઠેન્નિત્યં સ લભ્યતે ।
દત્તગોરક્ષકવચં સ્તવરાજં મયોદિતમ્ ॥ ૭॥

ન્યાસં ધ્યાનં ચ સંયુક્તો જપપૂજા વિશેષતઃ ।
સર્વસિદ્ધિપ્રદો નિત્યં મયાનુગ્રહકારકમ્ ॥ ૮॥

શ્રી ઈશ્વર ઉવાચ -
તવ ભક્તાય શાન્તાય પઠનાચ્ચિન્તિતં લભેત્ ।
સુરાસુરજનાગ્રે ચ ન મયા કથિતં પ્રિયે ॥ ૯॥

ૐ અસ્ય શ્રીદત્તગોરક્ષકવચમન્ત્રસ્ય સદાશિવ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીદત્તાત્રેયગોરક્ષપરમાત્મા દેવતા ।
ૐ બીજમ્ । અનુભવ શક્તિઃ ।

શ્રીદત્તગોરક્ષપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥ ૧૦॥

અથ કરન્યાસઃ ।
ૐ દ્રાં ધ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ॥

ૐ તં રં તર્જનીભ્યાં નમઃ ॥

ૐ ત્રં ક્ષં મધ્યમાભ્યાં નમઃ ॥

ૐ અં નં અનામિકાભ્યાં નમઃ ॥

ૐ બં થં કનિષ્ઠિકાભ્યાં નમઃ ॥

ૐ દ્રાં હ્રીં કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥ ૧૧॥

અથ હૃદયાદિન્યાસઃ ।
ૐ દ્રાં ધ્રાં હૃદયાય નમઃ ।
ૐ તં રં શિરસે સ્વાહા ।
ૐ ત્રં ક્ષં શિખાયૈ વષટ્ ।
ૐ અં નં કવચાય હુમ્ ।
ૐ બં થં નેત્રત્રયાય વૌષટ્ ।
ૐ દ્રાં હ્રીં અસ્ત્રાય ફટ્ ॥ ઇતિ દિગ્બન્ધઃ ॥

સર્વરક્ષણાર્થે સર્વસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥ ૧૨॥

॥ અથ ગાયત્રી ॥

ૐ આદિરૂપાય વિદ્મહે ૐ અનાદિરૂપાય ધીમહિ ।
તન્નો દત્તગોરક્ષપ્રચોદયાત્ ॥ ૧૩॥

॥ અથ મન્ત્રઃ ॥

ૐ ૐ દં વં તં ૐ ૐ ૐ દત્તગોરક્ષસિદ્ધાય નમઃ ॥

ઇતિ જપ્ત્વા શતત્રયમ્ ॥ ૧૪॥

॥ અથ ધ્યાનમ્ ॥

દિગમ્બરં ત્રિગુણાત્મકં નારાયણં નિરઞ્જનં યોગેશ્વરમ્ ॥

ૐ અનાદિનાથં સર્વવ્યાપિયોગિં સકલેશ્વરમ્ ॥

ચિન્મયં જ્યોતિરૂપં નિરાધારં સોઽહં બ્રહ્મસનાતનમ્ ॥

ઘોરરૂપં મહાઘોરં અષ્ટાઙ્ગયોગસિદ્ધિસિદ્ધેશ્વરમ્ ॥ ૧૫॥

ૐ નમો ભગવતે દત્તાત્રેયાય વિષ્ણવે ।
ગુરુપરમાત્મને વાસુદેવાય નમોઽસ્તુતે ।
ૐ નમો ગોરક્ષનાથાય રુદ્રાય ત્રૈલોક્યાધિપતયે ।
જિતેન્દ્રિયાય સનાતનાય નમોઽસ્તુતે ॥ ૧૬॥

શિખાયાં પાતુ ગોરક્ષં બ્રહ્મરન્ધ્રેચ દત્તકમ્ ।
ભાલે ગોરક્ષનાથશ્ચ દત્તાત્રેયો ભ્રુવસ્થલે ॥ ૧૭॥

ચક્ષુભ્યાં ઘોરયોગીન્દ્ર ગર્ભયોગીન્દ્ર કર્ણકૌ ।
પાહિ માં દત્તગોરક્ષ વામદક્ષિણનાસિકામ્ ॥ ૧૮॥

મુખે ગોરક્ષનાથં ચ  દત્તં ચૈવાધરોષ્ઠકે ।
જિહ્વાયા પાતુ ગોરક્ષં દન્તાન્પાતુ ચિબુત્રકમ્ ॥ ૧૯॥

અનસૂયાસુતં કણ્ઠે ગોરક્ષં કણ્ઠપૃષ્ઠકે ।
વામદક્ષિણહસ્તૌ ચ દત્તગોરક્ષ પાહિ મામ્ ॥ ૨૦॥

સત્સેના હૃદયે પાતુ દત્તગોરક્ષદૈવતમ્ ।
કટ્યા નાભિં ચ માં પાતુ દત્તગોરક્ષ યોગિનામ્ ॥ ૨૧॥

ઊરૌ જઙ્ઘાદિલિઙ્ગાતં પાતુ ગોરક્ષદત્તકમ્ ।
પાદૌ પાદતલાન્તં ચ દત્તગોરક્ષ પાહિમામ્ ॥ ૨૨॥

મસ્તકાપાદપર્યન્તં આપાદતલમસ્તકમ્ ।
દત્તાત્રેયં ચ ગોરક્ષં પાતુ માં સર્વતસ્તનુઃ ॥ ૨૩॥

દિશાષ્ટૌ ચ તથાઽઽકાશં પાતાલે વિદિશાષ્ટકે ।
દિવારાત્રૌ ત્રિવેલાયાં દત્તગોરક્ષ પાહિ મામ્ ॥ ૨૪॥

જલાગ્નિઘોરયુદ્ધે ચ શસ્ત્રઘાતે વિષત્તકે ।
રક્ષ રક્ષ સદા દેવ દત્તગોરક્ષદૈવતમ્ ॥ ૨૫॥

મન્ત્રાદિ યન્ત્રતન્ત્રાણાં કલ્પકોટિન્યકૃત્તિમમ્ ।
રક્ષ રક્ષ સદા દેવ દત્તગોરક્ષદૈવતમ્ ॥ ૨૬॥

અગ્નિપાર્થે ચૌરસર્પે વ્યાઘ્રદુષ્ટભયે વને ।
રક્ષ રક્ષ સદા દેવ દત્તગોરક્ષદૈવતમ્ ॥ ૨૭॥

ભૂતપ્રેતપિશાચોગ્રકૂષ્માણ્ડા ભૈરવાદયઃ ।

ડાકિનીશાકિનીકૃત્યા પાદગોરક્ષદત્તકમ્ ॥ ૨૮॥

સ્વર્ગપાતાલભૂલોકે યત્ર યત્ર ભવેત્શિવમ્ ।
તત્ર રક્ષતુ ગોરક્ષં દત્તાત્રેયશ્ચ પાતુ મામ્ ॥ ૨૯॥

ૐ નમો દેવદેવેશ નમો દેવાધિનાયક ।
નમો ગોરક્ષનાથાય દત્તાત્રેય નમો નમઃ ॥ ૩૦॥

નમો ઋગ્વેદરૂપાય નમો યજુસ્વરૂપિણે ।
નમો ગોરક્ષનાથાય દત્તાત્રેય નમો નમઃ ॥ ૩૧॥

નમો સામસ્વરૂપાય નમોઽથર્વણરૂપિણે ।
નમોઽસ્તુ નવનાથાય નમો ષોડશસિદ્ધયે ॥ ૩૨॥

નમો અનાદિદેવાય નમો આદિસ્વરૂપિણે ।
નમો વેદસ્વરૂપાય નમો સિદ્ધાન્તરૂપિણે ॥ ૩૩॥

નમો નિર્મલરૂપાય નમો ચિન્મયવ્યાપિને ।
નમો વિદ્યુત્સ્વરૂપાય નમો જ્યોતિસ્વરૂપિણે ॥ ૩૪॥

નમો અઘોરરૂપાય નમો નિષ્કર્મરૂપિણે ।
નમો વિશ્વસ્વરૂપાય નમો સર્વસ્વરૂપિણે ॥ ૩૫॥

નમો અનન્તરૂપાય નમો બોધસ્વરૂપિણે ।
નમો સકલસ્વરૂપાય નમો વજ્રસ્વરૂપિણે ॥ ૩૬॥

નમો કલ્મષનાશાય નમો પાપપ્રણાશિને ।
નમો ચારુસ્વરૂપાય નમો દિવ્યસ્વરૂપિણે ॥ ૩૭॥

નમો દુષ્ટપ્રણાશાય નમો દૈત્યાન્તકાય ચ ।
નમો અધર્મનાશાય નમો ધર્મસ્વરૂપિણે ॥ ૩૮॥

નમો નિષ્કર્મરૂપાય નમો કર્માન્તકાય ચ ।
નમો ભસ્માઙ્ગરાગાય નમો દિગમ્બરાય ચ ॥ ૩૯॥

નમો સુસ્મિતવક્ત્રાય નમો સુસ્મિતલોચન ।
નમો દ્વેષવિનાશાય નમો ક્રોધાન્તકાય ચ ॥ ૪૦॥

નમો નિઃશઙ્કરૂપાય નમો વૈરાગ્યરૂપિણે ।
નમો મઙ્ગલરૂપાય નમો કલ્યાણરૂપિણે ॥ ૪૧॥

ઋદ્ધિસિદ્ધિફલં દાતા ભુક્તિમુક્તિપ્રદાયકમ્ ।
નમોઽસ્તુ દત્તગોરક્ષં સંસારાર્ણવતારણમ્ ॥ ૪૨॥

ઇતિ દત્તસ્તવં દિવ્યં દત્તગોરક્ષકં શુભમ્ ।
પઠનાલ્લભતે શૈવં વાક્સિદ્ધિર્દેહસિદ્ધિદમ્ ॥ ૪૩॥

યોગસિદ્ધિઃ સર્વસિદ્ધિઃ ઇષ્ટસિદ્ધિર્લભન્તિ ચ ।
દુષ્ટદાનવસંહર્તા નિર્ભયો જાયતે નરઃ ॥ ૪૪॥

ન મૃત્યુર્ન જરા રોગં નિર્ભયો જાયતે નરઃ ।
તત્રૈવ વિજયો લાભો યત્ર તિષ્ઠતિ સાધકઃ ॥ ૪૫॥

સ્વશક્તિસહિતાદેવ નવનાથેષુ બોધના ।
સગણશક્તિસહિતા દેવ પ્રસન્નસઙ્ક્રમાત્ ॥ ૪૬॥

ૐ નમો દત્તાત્રેયાય નમો નમોઽસ્તુ
ૐ વિષ્ણુસ્વરૂપાય નમો નમોઽસ્તુ ।
ૐ નમો ગોરક્ષનાથાય નમો નમસ્તે
ૐ શિવસ્વરૂપાય નમો નમસ્તે ॥ ૪૭॥

ઇતિ શ્રીરુદ્રયામલે શ્રીઈશ્વરપાર્વતીસંવાદે
દત્તગોરક્ષનાથકવચસ્તવરાજં સમ્પૂર્ણમ્ ।

શ્રીદત્તાત્રેયાર્પણમસ્તુ । શુભમસ્તુ । શ્રીરસ્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded by Jonathan Wiener
Proofread by Jonathan Wiener, NA, PSA Easwaran

*shrIdattagorakShanAthakavachastavarAjaH*
pdf was typeset on April 28, 2018

Please send corrections to *sanskrit@cheerful.com*